# Shri Raghunatha Mangala Stotram

# શ્રીરઘુનાથમઙ્ગલસ્તોત્રમ્

## Document Information

Text title : Shri Raghunatha Mangala Stotram

File name : raghunAthamangalastotram.itx

Category : raama, mangala

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 12, 2020

*sanskritdocuments.org*

Shri Raghunatha Mangala Stotram

# શ્રીરઘુનાથમઙ્ગલસ્તોત્રમ્

મઙ્ગલં લોકરામાય રઘુરામાય મઙ્ગલમ્ ।
મઙ્ગલં પદ્મવક્ત્રાય રામભદ્રાય મઙ્ગલમ્ ॥ ૧॥

મઙ્ગલં કોસલેન્દ્રાય રામચન્દ્રાય મઙ્ગલમ્ ।
મઙ્ગલં મમ નાથાય રઘુનાથાય મઙ્ગલમ્ ॥ ૨॥

મઙ્ગલં રણધીરાય રઘુવીરાય મઙ્ગલમ્ ।
મઙ્ગલં સત્યસન્ધાય રાજસિંહાય મઙ્ગલમ્ ॥ ૩॥

મઙ્ગલં નિરવદ્યાય વેદવેદ્યાય મઙ્ગલમ્ ।
મઙ્ગલં મુક્તિમૂલાય મેઘનીલાય મઙ્ગલમ્ ॥ ૪॥

મઙ્ગલં સત્વરધ્વસ્તરુદ્રચાપાય મઙ્ગલમ્ ।
મઙ્ગલં જાનકીનેત્રપૂર્ણપાત્રાય મઙ્ગલમ્ ॥ ૫॥

મઙ્ગલં મિથિલાનાથમૌલિરત્નાય મઙ્ગલમ્ ।
મઙ્ગલં નિસ્સપત્નાય મઙ્ગલં નીલશાલિને ॥ ૬॥

મઙ્ગલં મૈથિલીધન્યવનવાસાય મઙ્ગલમ્ ।
મઙ્ગલં લક્ષ્મણોપાત્તભૃત્યકૃત્યાય મઙ્ગલમ્ ॥ ૭॥

મઙ્ગલં ગુહસઙ્ગેન ગઙ્ગાકૂલનિવાસિને ।
મઙ્ગલં ગૌતમીતીરપારિજાતાય મઙ્ગલમ્ ॥ ૮॥

મઙ્ગલં દણ્ડકારણ્યવાસિનિર્વાતચેતસે ।
મઙ્ગલં શબરીદત્તફલમૂલાભિલાષિણે ॥ ૯॥

મઙ્ગલં સદ્ગુણારોપચાપહસ્તાય મઙ્ગલમ્ ।
મઙ્ગલં વાયુપુત્રેણ વન્દનીયાય મઙ્ગલમ્ ॥ ૧૦॥

મઙ્ગલં વાલિસુગ્રીવહર્ષશોકાભિઘાતિને ।
મઙ્ગલં મૈથિલીમૌલિમણિરઞ્જિતવક્ષસે ॥ ૧૧॥

મઙ્ગલં સર્વલોકાનાં શરણ્યાય મહીયસે ।
મઙ્ગલં સાગરોત્સાહશ‍ૃઙ્ગભઙ્ગવિધાયિને ॥ ૧૨॥

મઙ્ગલં વાસવામિત્રમર્દનોવૃત્તબાહવે ।
મઙ્ગલં વિશ્વમિત્રાય વિદ્રાવણદયાદૃશે ॥ ૧૩॥

મઙ્ગલં વીક્ષમાણાય મૈથિલીવદનામ્બુજમ્ ।
મઙ્ગલં વિનિવૃત્તાય પુરં પૌરનિવૃત્તયે ॥ ૧૪॥

મઙ્ગલં ભરતપ્રીતિપ્રાપ્તરાજ્યાય મઙ્ગલમ્ ।
મઙ્ગલં મૈથિલીયોગમહનીયાય મઙ્ગલમ્ ॥ ૧૫॥

મઙ્ગલં હારકોટીરપાદપીઠાય મઙ્ગલમ્ ।
મઙ્ગલં રણધુર્યાય તુઙ્ગપન્નગશાયિને ॥ ૧૬॥

મઙ્ગલં સહ્યજામાત્યસાન્નિધ્યકૃતચેતસે ।
મઙ્ગલં માનુષે લોકે વૈકુણ્ઠમિતિ તિષ્ઠતે ॥ ૧૭॥

શેષશૈલનિવાસાય શ્રીનિવાસાય મઙ્ગલમ્ ।
મઙ્ગલં વેધસો વેદિમેદિનીગ્રહમેધિને ॥ ૧૮॥

વરદાય દયાધામ્ને વીરોદારાય મઙ્ગલમ્ ।
મઙ્ગલં ધનદાદાનદત્તસક્તિષિ સમ્પદે (?) ॥ ૧૯॥

મઙ્ગલં નારસિંહાય નરસિંહાય મઙ્ગલમ્ ।
મઙ્ગલં મામહીનીલાનિત્યમુક્તૈકચક્ષુષે ॥ ૨૦॥

ય ઇદં કીર્તયેન્નિત્યં મઙ્ગલં મઙ્ગલસ્તવમ્ ।
વર્તયેત્ પુરતસ્તસ્ય મઙ્ગલાયતનં હરિઃ ॥ ૨૧॥

ઇતિ શ્રીરઘુનાથમઙ્ગલં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Raghunatha Mangala Stotram*

pdf was typeset on September 12, 2020

Please send corrections to *sanskrit@cheerful.com*